चौरादिकग्रासयतिवत् (439) ज्ञेयानि। [A]अबल्ह्यः।

(1107) "बष्क दर्शने" (X-चुरादिः-1916. सक. सेट्. उभ.) [अ]

बष्ककः-ष्किका, बिबष्कयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगन्धयतिवत् (375) ज्ञेयानि। [B]बष्कयन्, [1]बष्कयणी।

(1108) "बस्त अर्दने" (X-चुरादिः-1683. सक. सेट्. आत्म.)

आकुस्मीयः।

'बस्तु—' इति मैत्रेयः। तस्य मते उदित्त्वाण्णिचो वैकल्पिकत्वम्। 'वस्त—' इति केचिद् दन्तोष्ठ्यादिं पठन्ति।

बस्तकः-स्तिका, बिबस्तयिषकः-षिका, बस्तयिता-त्री, बिबस्तयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगन्धयतिवत् (375) ज्ञेयानि। णिचो वैकल्पिकत्वात् पक्षे शुद्धात्, शुद्धप्रकृतिकसन्नन्तात्, यङन्ताच्च इमानि रूपाणीति विशेषः। यथा—बस्तकः-स्तिका, बिबस्तिषकः-षिका, बाबस्तकः-स्तिका; इति यथायथमूह्यानि। [C]बिबस्तयिषुः, [2]बस्तिः।

(1109) "बहि वृद्धौ" (I-भ्वादिः-633. अक. सेट्. आत्म.) [आ]

---

1. बाहुलकात् औणादिकेऽयप्रत्यये बष्कयः = तरुणवत्सः। सोऽस्य अस्तीति पामादित्वात् (5-2-100) नप्रत्यये णत्वे ङीपि च बष्कयणी = चिरप्रसूता गौः।
2. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इति णिजभावपक्षे इक्प्रत्यये रूपम्। बस्तिः = मूत्रकोशः।

A. 'नाहं बर्हयितास्म्यबल्ह्यमपि भोः सर्वैरिदं गोप्यते........॥' धा. का. 3.44.

B. 'लोके बष्कयतीह चित्रितमहामञ्चे स्वयं चित्रयन्
दोष्णा खड्गमुदंस्य तस्य वटयन् हस्तादगृह्लादमुम्।' धा. का. 3. 61.

C. 'प्रस्पाश्य मुष्टिमभितर्जयते प्रभत्स्यों
मल्लो बिबस्तयिषुरेनमगन्धनीयम्।' धा. का. 3.34.

[अ] 'कर्तृकरणाद् धात्वर्थे (ग. सू. चुरादिः) इत्यत्र तद्गणसूत्रनिदर्शनार्थमुपात्तेषु धातुष्वयमेकः। क्वचित् 'बल्क दर्शने' इत्युपात्तम्। 'पोटायुवतिस्तोककतिपय-गृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः' (2-1-65) इत्यत्र बष्कयणीशब्दस्योपादानात्, माधव-धातुकाव्यकारप्रभृतिभिरुपादानाच्चास्माभिः बष्क इति पाठमादृत्यैवमत्र लिखितम्।

[आ] क्षीरस्वामी चुरादिषु (आस्वदीयेषु) भाषार्थकदण्डकेऽपि बहिधातुं पठित्वा बंहयतीत्युदाहृतवान्। अन्ये केऽपि नामुं धातुं पठन्ति। अनतिप्रयोजनकत्वात् बहुत्र तस्यानुपलम्भात् वहिधातोः बहि इति मुद्रणसम्भवाच्चास्माभिरयं परित्यक्तः।